दिनाङ्क :- 11.11.2025

प्रात: - 06:55

## रक्तदुर्ग-महास्फोट

गतसायं नवदिल्ली-नगरे लाल-किला-मेट्रोस्थानकस्य समीपे एकः भीकरः कारयान-विस्फोटः अभवत् । वार्ताहरैः सह भाषणं कुर्वन् दिल्ली-आरक्षी-आयुक्तः सतीश-गोल्चा अवदत् यत् सायं द्विपञ्चाशदुत्तर-षड्वादने मन्दगतिवाहनं रेड्-लाइट् इति यातायात-संकेते स्थगितम्, तस्मिन् याने विस्फोटः अभवत् । सः अवदत् यत् विस्फोटस्य कारणेन समीपस्थवाहनानाम् अपि क्षतिः अभवत् । प्रधानमन्त्री नरेन्द्रमोदी दिल्लीनगरे विस्फोटस्य पश्चात् स्थितेः सूचनां प्राप्तवान् ।

## अमित शाहः

केन्द्रीय गृहमन्त्री अमितशाहः दिल्लीनगरस्य लाल-किला इति रक्तदुर्गस्य समीपस्थस्य विस्फोटस्थलस्य भ्रमणं कृत्वा स्थितिं समीक्षितवान् । गृहमन्त्री दिल्ली-आरक्षी-आयुक्तेन, स्थले उपस्थितैः अन्य-वरिष्ठाधिकारिभिः च स्थितिविवरणं प्राप्तवान् । गृहमन्त्री लोकनायक-जयप्रकाश-चिकित्सालये अपि गत्वा व्रणितान् मिलितवान् । वार्ताहरैः सह संवादं कुर्वन् श्रीशाहः अवदत् यत् चिकित्सालयस्य सूत्रानुसारं अस्यां घटनायाम् अष्टजनाः मृताः, केचन जनाः च व्रणिताः सन्ति ये चिकित्सालये चिकित्सां स्वीकुर्वन्ति।

श्रीशाहः सूचितवान् यत् दिल्ली-अपराध-शाखायाः, दिल्ली-विशेषशाखायाः च दलानि विस्फोटस्थानं प्राप्तवन्तः तथैव एन.एस.जी-एन.आई.ए-दलयोः न्यायिकदलेन सह सम्यक् अन्वेषणं आरब्धम् अस्ति ।

## राष्ट्रपतिः

राष्ट्रपतिः द्रौपदी मुर्मूः एवं उपराष्ट्रपतिः सी पी राधाकृष्णन् च दिल्लीनगरे विस्फोटे मृतकानां परिवाराणां कृते शोकसंवेदनां प्रकटितवन्तौ । राष्ट्रपतिः उपराष्ट्रपतिः च प्रत्येकस्मिन् सामाजिक-माध्यम-सन्देशे, व्रणितानाम् शीघ्रं स्वस्थतायै प्रार्थितवन्तौ ।

## दिल्ली मुख्यमंत्री

दिल्लीमुख्यमन्त्री रेखा गुप्ता राष्ट्रराजधान्यां देहल्यां कारयानविस्फोटे व्रणितान् मिलितुं एल्.एन्.जे.पि. चिकित्सालयं गतवती । सामाजिकमाध्यम-सन्देशे रेखा गुप्ता उक्तवती, यत् सा चिकित्सालये तेषां स्थितिं पृष्टवती, शीघ्र-स्वस्थतायै च प्रार्थितवती । सा अधिकारिभ्यः अपि निर्देशं दत्तवती यत् क्षतिग्रस्तेभ्यः सद्यः अत्यन्तं शीघ्रं च सर्वाणि आवश्यकानि चिकित्सा-सुविधानि सुनिश्चितं कुर्वन्तु इति ।

केन्द्रीय औद्योगिकसुरक्षाबल::

(CISF) इति केन्द्रीय औद्योगिकसुरक्षाबलेन उक्तम् यत् नवदिल्ली-नगरस्य रेडफोर्ट-मेट्रोस्थानकस्य समीपे वाहनविस्फोटस्य अनन्तरं राष्ट्रियराजधानीक्षेत्रे (एनसीआर) दिल्लीमेट्रो, लालकिला इति रक्तदुर्गः, सर्वकारीय-भवनानि, इन्दिरागान्धी-अन्ताराष्ट्रिय-विमानस्थानकैः सहितं सीआईएसएफ-निरीक्षणे यानि स्थलानि सन्ति ते उच्चसचेतनायां स्थापितानि सन्ति । अपरत्र विस्फोटस्य अनन्तरं उत्तरप्रदेशः, पञ्जाबः, राजस्थानः, बिहारराज्याणां आरक्षिबलानि अपि उच्च-सुरक्षा-प्रबन्धनं कृतवन्तः ।

दूतावासः

भारते मिस्रस्य दूतावासेन, कारविस्फोटेन प्रभावितानां परिवाराणां प्रियजनानाञ्च कृते शोकः प्रकटितः । विस्फोटस्य अनन्तरं जापानदेशस्य, अर्जेन्टिनादेशस्य, भारतस्य ब्रिटिश-उच्चायुक्तस्य, भारतस्य बाङ्गलादेशस्य उच्चायुक्तस्य, इरान्-देशस्य दूतावासस्य पक्षतः अपि शोकाः प्रकाशितवन्तः ।

बिहार-मतदानम्

बिहारस्य विधानसभानिर्वाचनार्थं अन्तिमचरणस्य मतदानम् अद्य भविष्यति । अस्मिन् चरणे विंशति-मण्डलेषु द्वाविंशत्युत्तर-एकशतम् निर्वाचनक्षेत्रेषु मतदानं भवति । मतदानं प्रातः सप्त वादनात् आरभ्य सायं षड्-वादनपर्यन्तं भविष्यति। परन्तु सुरक्षाकारणात् सप्तविधानसभाक्षेत्रेषु मतदानस्य समाप्तिः सायं पञ्च वादने भविष्यति।

आईएसएसएफ विश्वचैम्पियनशिप

शूटिंग्-क्रीडायां कइरोनगरे ISSF इति विश्वचैंम्पियनशिप-स्पर्धायां सम्राट् राणा पुरुषाणां दश-मीटर् एयर-पिस्तौल-सुवर्णं प्राप्य प्रथम-भारतीय-व्यक्तिगत-एयर-पिस्तौल-विश्वविजेता अभवत् ।